International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(2): 251-253
© 2026 IJMH
www.themultijournal.com
Received: 26-03-2026
Accepted: 10-04-2026
Publish : 11-04-2026

**तृप्तिमयी होता**
अतिथि-अध्यापिका
राजेन्द्रविश्वविद्यालयः,बलाङ्गिरम्

**Correspondence:**
**तृप्तिमयी होता**
अतिथि-अध्यापिका
राजेन्द्रविश्वविद्यालयः,बलाङ्गिरम्

# काश्मिरोदयखण्डकाव्ये काश्मीरस्य दर्शनीयस्थानानि

**तृप्तिमयी होता**

**कूटशब्दाः- अक्षुर्णताम्, जागरुकम्, उडुपेषु, प्रावारकम्।**

**उपक्रमः-**

ऋगवेदादारभ्य संस्कृतवाङ्मयस्य तरङ्गिणी अद्यावधि लौकिकमहाकाव्यसमुद्रे अक्षुर्णतां धारयति । ऋगवेदे प्राप्तसम्बादसूक्तस्याख्यानं, तस्य विस्तृतं व्याख्यानं च ब्राह्मणग्रन्थे तु लभ्यते । परन्तु एतादृशमाख्यानं तावत् संपूर्णं न भवति , यावत् इतिहासपुराणानामनुशीलनं न क्रियते । पुराणेभ्य पूर्वमपि ऐतिहासिकग्रन्थानां परिचयः दृश्यते । यत् प्रागेव उक्तम् **"इति ह आस"** इति निरुक्त उक्त्यानुसारं पूर्वघटितानां प्रत्यक्षवर्णनमेव इतिहासग्रन्थानां मुख्यविषयो भवति । व्युत्पत्यार्थानुसारेण इतिहासकेवलं प्राचीनकथाभ्यः शिक्षां स्वीकृत्य वर्तमानं भविष्यतकालं प्रति जागरुकं भवति । शिक्षा दृष्ट्या महाभारतम् अन्येषु इतिहासेषु श्रेष्ठमस्ति । उक्तमस्ति यत् –

**इतिहासोत्तमे यस्मिन्नर्पिता बुद्धित्तमा**
**इतिहासोत्तमादस्माज्जायते कविबुद्धयः**[1]

ऐतिहासिककाव्येषु गद्यकाव्यरुपेण हर्षचरितं सर्वप्रथमं वर्त्तते । तथैव वेमभूपालचरितम्, वरदाम्बिका-परिणयचम्पू ऐतिहासिकचम्पूकाव्यत्वेन प्रसिद्धम् । ऐतिहासिकनाटकत्वेन मुद्राराक्षसम्, देवीचन्द्रगुप्तम्, कर्णसुन्दरी च प्रसिद्धाः । ऐतिहासिकमहाकाव्यत्वेन बुद्धचरितं सुप्रसिद्धं वर्त्तते । तथैव संस्कृतऐति-हासिककाव्येषु राजतरङ्गिणी अग्रगण्यास्ति । अत्र काश्मिरराज्यस्य इतिहासविषये वर्णना दृश्यते ।

एवमाधारेण ऐतिहासिककाव्यपरम्परायां काश्मीरोदयकाव्यस्य महत्वं वरीवर्त्तते एव । काश्मी-रोदयकाव्यस्य वर्णनाशैली अतीव रमणीयास्ति ।

कविसूर्यमणिरथमहोदयः आदौ एव लिखितमस्ति यत् -

**एतादृशेन विभवेन विभूषितस्य**
**तस्यास्ति पर्वतविराजितभूरुदीच्याम् ।**
**काश्मीर इत्यभिधया जनमानसेषु**
**ख्यातिं चिराय विमलां परितो वहन्ती ।**[2]

भारतस्योत्तरस्यां दिशि नगाधिराजहिमालयस्य पाददेशे अतिरमणीयः चित्ताकर्षकः शान्तिप्रदः देवानां प्रियः सौन्दर्यविभूषितः काश्मिरप्रदेशः विद्यते । अत्रत्य रमणीयतां विलोक्यैव प्रदेशोऽयं लोके भूस्वर्गः इति प्रख्यातः। मानवसभ्यतायाः उत्पत्तिः अस्मादेव बभूवेति विदुषां मतम् । पुराकालादेव काश्मीरः भारतवर्षस्याविच्छेद्याांगं वर्त्तते । सांस्कृतिक- राजनैतिक-भौगोलिकदृष्ट्या च काश्मीरः भारतवर्षस्य कृते अतीव महत्वपूर्णं वर्तते । पुरा काले काश्मीरः सम्पूर्णभारतवर्षस्य ज्ञानपरम्परायाः प्रमुख-केन्द्रमासीत्। कल्हणविरचित- राजतरङ्गिण्यां वर्ण्यते यत् जयापीडः नामकः नृपः पृथीव्याः सर्वान् बुधान् स्वराज्ये प्रतिष्ठापितवान् येन अन्येषु राज्येषु विदुषां अभावः परिलक्षितः।

**समग्रहीत्तथा राजा सोऽन्विष्य निखिलान्बुधान्।**
**विद्वदुर्भिक्षमभवद्यथाऽन्यनृपमण्डले ।।**[3]

काश्मीरस्य प्राचीन नाम 'शारदादेशः' आसीत् । ज्ञानप्राप्त्यर्थं जनाः काश्मीरं समागच्छन्ति स्म । अर्थात् काश्मीरे ज्ञानदेव्याः मातुः सरस्वत्याः साक्षात् वासः।

**नमस्ते शारदे देवी काश्मीरपुरवासिनी।**
**त्वामहं प्रार्थये नित्यं विद्यादानं च देहि मे॥**

यत्र साक्षात् सरस्वत्याः वासोऽस्ति तत्र कथं नु खलु प्रवहिष्यति ज्ञानामृतस्य धारेति ? संस्कृतवाङ्मयं प्रति काश्मीरस्यावदा-नमन्यतमम् । अस्मिन् वाङ्मये काश्मीरस्य नैके कवयः लेखकाः दार्शनिकाः आलंकारिकाः ज्योतिषविशारदाः कर्मकाण्डिनः विद्वांसः आसन्। यैः अनेकानि ग्रन्थानि विरचितानि । तेषु प्रमुखाः सन्ति- कल्हणस्य राजतरङ्गिणी, क्षेमेन्द्रस्य औचित्यविचार्यचर्चा, आनन्दवर्धनस्य ध्वन्यालोकः, मम्मटस्य काव्यप्रकाशः, जयन्तभट्टस्य न्यायमञ्जरी, पिङ्गलस्य छन्दशास्त्रमिति ।

'राजतरङ्गिणी' काश्मीरस्य एकः महत्वपूर्णग्रन्थोऽस्ति। इतः पूर्वं न केनाऽपि लिखितः एतादृशः ग्रन्थः। प्रामाणिकत्वेन (समयानुसारम्) इतिहासलेखनपरम्परायां राजतरङ्गिणी सर्वप्रथमः ग्रन्थोऽस्ति। दर्शनपरम्परायामपि काश्मीरस्य स्वतन्त्रः परिचयो वर्तते, प्रत्याभि-ज्ञादर्शनम् अर्थात् काश्मीरशैवदर्शनमिति। न केवलं ज्ञानपरम्परायां काश्मीरः सुसमृद्धः अपितु शीतलसमीरयुक्तः हिमाच्छादितः केश-रकुङ्कुमगन्धयुक्तः सेवनासपतिप्रभृतिसुस्वादुफलयुक्तः ऐतिहासिक-स्थलपरिपूर्णः तीर्थक्षेत्रेण शोभितः पर्वताविष्टः नदिभिः पावितः अतिरमणीयः हृदयाल्हादकरः प्राकृतिकसौन्दर्यविभूषितः प्रदेशो-ऽस्ति। अतः राजतरङ्गिण्यामपि कविः काश्मीरस्य प्रकृत्याः वर्णनं कुर्वन् काश्मीरः श्रेष्टः इति दर्शितवान्। विद्यावेश्मानि तुङ्गानि कुङ्कुमं सहिमं पयः। द्राक्षेति यत्र सामान्यमस्ति त्रिदिवदुर्लभम् ।

**विद्यावेश्मानि तुङ्गानि कुङ्कुमं सहिमं पयः ।**
**द्राक्षेति यत्र सामान्यमस्ति त्रिदिवदुर्लभम् ।।**[4]
**त्रिलोक्यां रत्नसूः श्लाघ्या तस्यां धनपतेर्हरित्।**
**तत्र गौरीगुरुः शैलो यत्तस्मिन्नपि मण्डलम् ॥**[5]

काश्मीरस्य एतत् प्राकृतिकसौन्दर्यं प्रति आकृष्टाः सन् अनेकप्राची-नार्वाचीनकवयः काश्मीरमाहृत्यानेककाव्यानि रचयामासुः । तेषु आधुनिककविः सूर्यमणिरथः अन्यतमः। काश्मीरमाहृत्यायं "काश्मी-रोदयम्" नामकमेकं खण्डकाव्यमरचयत्। अस्मिन् काव्ये राजतर-ङ्गिणीव काश्मीरस्य राज्ञां विषये वर्णनं प्राप्यते। अतः इदमेकम् ऐतिहासिकं खण्डकाव्यमस्ति। अस्य काव्यस्य रचना सूर्यमणिरथः २०१२ खीष्टाब्दे कृतवान्। कविः हनुमत्प्रसादशास्त्रीमहोदयेन विरचितं "काश्मीरेतिहासम्" कल्हणस्य "राजतरङ्गिणीम्" च ग्रन्थौ आधारीकृत्य अस्य काव्यस्य रचनामकरोत् । कव्यमिदं भागद्वयेन विभज्यते "निशा- उदयः" "प्रातरूदयः" चेति। निशा-उदये गोनन्दना-दारभ्य रणजितसिंहात् पूर्वं यावदंशः वर्णितः। प्रातरूदये रणजितसिंहमारभ्य काश्मीरे ये शासकाः सञ्जाताः ते काश्मीरस्य उन्नतये सान्तरं यतमानाः आसन् । अस्य काव्यस्य अयमंशः प्रातरूदयः इति नाम्ना नामितः। अस्य काव्यस्य अन्तिमभागे कविः अतिचारूतया काश्मीरस्य दर्शनीयस्थानविषये आलोकपातः कृतवान् अस्ति। अस्मिन् काव्ये द्वासप्तति-उत्तर-एकशत (१७२) श्लोकाः सन्ति ।

काव्यस्यान्तिमे भागे कविः स्वस्य परिचयविषये कथयति यत् सः आत्रेयगोत्रीयः आसीत् । तस्य पितुः नाम जनार्दनरथः, मातुः नाम नेत्रमणीरथः चासीत्। पुनश्च अन्तिमभागे कविः कथम् अतिचारूतया काश्मीरस्य दर्शनीयस्थानविषये आलोकपातः कृतवान् इति मम शोधवाचनपत्रस्य विषयः।

१९४७ खीष्टाब्दे चन्द्रशेखरसुभासप्रभृतीनां नेतॄणां बहुद्यमबलेन भारतं स्वतन्त्रराष्ट्रम् अभवत् । तस्मात् दिनात् काश्मीरप्रदेशः भारतस्य अविच्छेद्याङ्गरूपेण शोभते। "काश्मीरः" इति शब्दः "कश्" धातोः मुडागमानन्तरम् 'ईरन्' इति स्वार्थे "अण्" प्रत्यययोगेन व्युत्पत्तिर्जायते। यस्य देशस्य नाम सार्थक्ये कश् इति धातुः वर्तते सः देशः कथं सर्वदा प्रकाशमयः न स्यात्। अर्थात् अस्मात् स्पष्टीयते यत् काश्मीरस्य सौन्दर्यम् अतूलनीयम्। काश्मीरः बहुदर्शनीयस्थानेषु परिपूर्णः। तेषु अस्मिन् काव्ये बहूनां दर्शनीयस्थानानां चर्चा कृतास्ति। कविः काश्मीरस्य राजधानी श्रीनगरं विषये कथयति यत् श्रीनगरम् एका समृद्धा पर्यटनस्थली वर्तते। अशोकः अस्य नगरस्य निर्माणं कृतवान् । स्वर्गसमानकान्तियुक्तं श्रीनगरमद्यापि विविध-भाष्करशिल्पकलादिभिः शोभते।

**श्रीपूर्वकं नगरमाढ्यमतीवरम्यं**
**संस्थापितं सुकृतिनां प्रमुखेन तेन ।**
**अद्यापि यल्लसति नाकसमानकान्ति**
**भास्कर्यसांस्कृतिकशिल्पकलाप्रशस्ति ।**[6]

काश्मीरस्य राजधान्यां श्रीनगरे पर्वतपादतले एकः विशालः ह्रदः वर्तते। यस्य नाम 'डालः' इति। तस्य ह्रदस्य दर्शनार्थम् अनेकदेशीय-वैदेशीकपर्यटकाः आगत्य तस्य सुन्दरतायाः उपभोगं नौकाविहरणं च कुर्वन्ति। डालह्रदे नौकाविहरणम् उडुपेषु विपणनम् इति एतत् द्वयं सर्वाधिकमाकर्षणीयम् । स्वेतपद्मयुतः सः ह्रदः हंसविलासेन अन्यदपि आकर्षणीयो भवति। रात्रौ पर्यटकाः ह्रदे एव नौकासु निर्मितगृहेषु निवसन्तः रात्रीशोभायाः उपभोगं कुर्वन्ति। डालह्रदो लसति पर्वतपाददेशे भूस्वर्गभूमिवलये स्वतनुं वितन्वन् ।

**देशान्तराधिगतपर्यटकैः परीते**
**यत्रोडुपेषु पणनं क्रियते वणिग्भिः।**[7]
**नौकागृहे ह्रदगतेऽतितरां मनोज्ञे**
**नीलाभया विलुलिते रजनीषु यत्र ।**[8]

श्रीनगरस्य समीपे डालह्रदस्य अनतिदूरे ब्रह्मणा निर्मितं 'पहलगाम' नामकं विख्यातपर्यटनस्थानं विद्यते । अस्मिन् स्थाने आवुभालि वेतावभालिरिति नितान्तं दर्शनीयस्थानद्वयमस्ति। प्राकृतिकसौन्दर्य-विभूषितमेतत् स्थानद्वयं सर्वदा पर्यटकानां मनो हरति ।

**यत्पार्श्ववर्ति विधिनिर्मितमस्ति हृद्यं**
**स्थानं सदा पहलगामिति दर्शनीयम् ।**
**वेतावभालिरवुभालिरिति प्रसिद्धं**
**यस्मिन् विराजति च चन्दनवाटिकाऽपि ।**[9]

अस्मात् किञ्चित् दूरे "चन्दनवाटिका" (चन्दनवाडि) नामकम् अपर-मेकं पर्यटनस्थलं वर्तते। अस्मादेव स्थानात् भक्ताः प्रसिद्धम् अमरनाथदर्शनार्थं ब्रजन्ति ।

**नैसर्गिकं च गिरिमूर्धनि राजमानं**
**मुक्तिप्रदायकमपूर्वमतीवरम्यम्।**
**भक्ता जना अमरनाथतुषारलिङ्गं**
**द्रष्टुं ब्रजन्ति किल चन्दनवाटिकातः॥**[10]

श्रीनगरात् कियत् दूरे "गोलमार्गः सोनमार्गश्चेति" रमणीयपर्यटन-स्थलद्वयं वर्तते। सोनमार्गे एका रमणीया पर्वतनिःसृतनिर्झरिणी वर्तते। गोलमार्गः सुदीर्घैः सरलैः पाइनजातीयपादपैः अतितरां शोभते ।

**स्वच्छाम्बुनिर्झरजनादविमण्डिताङ्ग**
**श्चेतोहरः प्रकृतिसुन्दरसोनमार्गः ।**
**आकाशचुम्बिसरलैस्तरुभिर्विराजन्**
**वैदेशिकान् च परिकर्षति गोलमार्गः ।।**[11]

शीतकाले काश्मीरस्य शोभा अतितरां वर्धते । अस्मिन् काले अतिमात्रेण तुषारपातः जायते। सर्वे अपि जनाः तुषारपातस्य आनन्दं नेतुं काश्मीरं गन्तुमिच्छन्ति। तुषारपातः सर्वेषां मनो हरति। सर्वत्र हिमपातात् पादपाः आच्छादिताः भवन्ति। एतदुत्प्रेक्ष कविः वर्णयति यत् निविडपादपैः शोभितस्य काश्मीररूपिणः नायकस्य कोमल-शरीरोपरि प्रकृतिनायिका अनुरक्ता भूत्वा शुभ्रं हिमरूपकं सुन्दरं प्रावारकम् अच्छादयति किमु ? अर्थात् सर्वं हिमाच्छादितं शुभ्रं भवति ।

**एतस्य पेलवतनूपरि शीतकाले**
**सर्वत्र भूरिघनपादपराजितस्य**
**प्रावारकं सुघटितं वहलैस्तुषारै-**
**राच्छाद्यते प्रकृतिनायिकया सरागम् ॥**[12]

एतानि दर्शनीयस्थानानि विहाय अनेकतीर्थ- ऐतिहासिकस्थलानि च वर्णितानि । ग्रन्थारम्भे मङ्गलाचरणे त्रिकूट-त्रिभूवन-जननी-श्रीवैष्णव्याः श्रीजगन्नाथधामस्य च वन्दना क्रियते। सनातनधर्मे श्री-वैष्णोदेवीमन्दिरं पवित्रमन्दिरेषु अन्यतमम्। एतन्मन्दिरं जम्बुप्रा-न्तस्य कटराग्रामस्य पार्श्वे स्थितः त्रिकूटपर्वतशिखरे शोभते। प्रतिवर्षं बहवो जनाः मातुः श्रीवैष्णव्याः दर्शनार्थं काश्मीरं गच्छन्ति। श्रीजगन्नाथधामः चतुर्षु पवित्रधामेषु अन्यतमः। अयं धामः उत्कलप्रदेशस्य पुरीमण्डले महोदधितीरे श्रीक्षेत्रे विद्यते। काव्ये तुङ्गेश्वराख्यस्य मन्दिरमेकस्य वर्णनं प्राप्यते यस्य निर्माणं तुञ्जिनेन कृतमासीत् ।

**वाक्पुष्टया सुमतिरञ्जितयाऽनुवेलं**
**पत्न्या समेधितमतेर्नृपतेः सुकीर्तेः।**
**तुङ्गेश्वराख्यमिति मन्दिरमीक्षणीयं**
**यस्योद्यमेन यमिनोऽतनु निर्मितश्च ।।**[13]

अनन्तदेवेनापि अनेकमठमन्दिराणि विरचितानीत्यपि वर्णनं प्राप्यते। परं तेषु एकस्यापि नामोल्लेखो न विद्यते।11 केनापि सूयेन निर्मित वन्धस्य (जलभण्डारस्य) अपि वर्णनं प्राप्यते।12 इत्थं काश्मीरे अनेकानि रमणीयानि मनोहारिणि तीर्थपर्यटनदर्शन-स्थानानि सन्ति। काश्मीरस्य दशनीयस्थानानि वीक्ष्य राजतर-ङ्गिण्यां वर्णितमस्ति यत्- काश्मीरे एतादृशं तिलांशोऽपि नास्ति यत् तीर्थक्षेत्रं न विद्यते, अर्थात् सम्पूर्णं काश्मीरमण्डलं तीर्थक्षेत्रमस्ति। उच्यते अपि-

**चक्रभृद्विजयेशादिकेशवेशावभूषिते ।**
**तिलांशोपि न यत्रास्ति पृथ्व्यास्तीर्थैर्बहिष्कृतः।।**[14]

देवाः अपि अस्य रमणीयतां प्रति आकृष्टाः भूत्वा स्वर्गात् आगत्य अत्र चिराय निवसन्ति न पुनः स्वर्गं प्रयान्ति ।

**एतां भूवं प्रकृतिसंचितवित्तरम्याम्।**
**द्रष्टुं समेत्य न पुनस्त्रिदिवं प्रयाताः ।।**[15]

भारतस्य गौरवः मुकुटमणिः भूस्वर्गः कश्मीरः चिरकालं यावत् शोभतामिति ।

**आसूर्यचन्द्रमिदमुन्नतभूमिखण्डम्**
**उत्तुङ्गपर्वतसरित्तरुराजिपूर्णम् ।**
**देवस्थलीति विदितं पृथिवीतले यद्**
**भायादभिन्नतनुवन्नवभारतस्य ॥**[16]

**उपसंहारः-**

काश्मीरदेशस्य सौन्दर्यं, सांस्कृतिकवैभवं, ऐतिहासिकमहत्वं च वर्णयन् काश्मीरोदयं काव्यमिदं रमणीयं भवति । काव्येऽस्मिन् केवलं प्रकृतेः सौन्दर्यवर्णनं न अपितु काश्मीरदेशस्य समग्रसंस्कृतेः इतिहासस्य मानवीयमूसल्यानां च प्रतिबिम्बः अस्ति । विशेषतया काव्ये राजानां वर्णना समुचितरीत्या प्रकटीक्रियते । एतत् काव्यं पाठकान् सहृदयान् च आनन्दयति शिक्षयति तथा च राष्ट्रप्रेमभावं वर्धयति इति सम् ।

**सन्दर्भग्रन्थसूची-**


1. काश्मीरोदयम्, रथः सूर्यमणिः, सर्वस्वत्वं प्रकाशिका ।
2. राजतरङ्गिणी,महाकविकल्हणः,पाण्डेयः श्रीरामतेजशास्त्री, चौ-खम्बा सुरभारती प्रकाशनम्,वाराणसी ।
3. स्कृत साहित्य का इतिहास, ऋषि शर्मा उमाशंकर, चौखम्बा भारती अकादमी, वाराणसी * संस्कृत साहित्य का इतिहास, उपाध्याय अचार्यबलदेव, शारदा निकेतन, वाराणसी ।


**सन्दर्भ**

1. म.भा-आ.प-2.236
2. का.ख- श्लो-32
3. रा.त-4/493
4. रा.त-1/42
5. रा.त-1/43
6. का.ख-श्लो-47
7. का.ख-श्लो-156
8. का.ख-श्लो-159
9. का.ख-श्लो-161
10. का.ख-श्लो-162
11. का.ख-श्लो-163
12. का.ख-श्लो-164
13. का.ख-श्लो-54
14. रा.त- 1/38
15. का.ख-170
16. का.ख-169